# Shri Shriyoganayika or RajarajeshvarI Sahasranamavali 1000 Names

# શ્રીયોગનાયિકા અથવા રાજરાજેશ્વરી સહસ્રનામાવલિઃ

## Document Information

Text title : yoganAyikA or rAjarAjeshvarIsahasranAmAvaliH 1000 Names

File name : yoganAyikAsahasranAmAvaliH.itx

Category : devii, sahasranAmAvalI, devI, dashamahAvidyA

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : rAkArAdirakArAntAdyAkSharaghaTitam

Source : mahAkAlasaMhitA, Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : May 30, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# Shri Shriyoganayika or RajarajeshvarI Sahasranamavali 1000 Names

# શ્રીયોગનાયિકા અથવા રાજરાજેશ્વરી સહસ્રનામાવલિઃ

રાકારાદિરકારાન્તાદ્યાક્ષરઘટિતમ્ ।

ૐ શ્રીરાજરાજેશ્વર્યૈ નમઃ । રાજરક્ષકાયૈ । રાજનર્તક્યૈ । રાજવિદ્યાયૈ ।
રાજપૂજ્યાયૈ । રાજકોશસમૃદ્ધિદાયૈ । રાજહંસતિરસ્કારિગમનાયૈ ।
રાજલોચનાયૈ । રાજ્ઞાં ગુરુવરારાધ્યાયૈ । રાજયુક્તનટાઙ્ગનાયૈ ।
રાજગર્ભાયૈ । રાજકન્દકદલીસક્તમાનસાયૈ । રાજ્ઞાં કવિકુલાખ્યાતાયૈ ।
રાજરોગનિવારિણ્યૈ । રાજૌષધિસુસમ્પન્નાયૈ । રાજનીતિવિશારદાયૈ ।
રાજ્ઞાં સભાલઙ્કૃતાઙ્ગ્યૈ । રાજલક્ષણસંયુતાયૈ । રાજદ્બલાયૈ ।
રાજવલ્લ્યૈ નમઃ । ૨૦

ૐ શ્રીરાજત્તિલ્વવનાધિપાયૈ નમઃ । રાજસદ્ગુણનિર્દિષ્ટાયૈ ।
રાજમાર્ગરથોત્સવાયૈ । રાજચક્રાઙ્કિતકરાયૈ । રાજાંશાયૈ ।
રાજશાસનાયૈ । રાજત્કૃપાયૈ । રાજલક્ષ્મ્યૈ । રાજત્કઞ્ચુકધારિણ્યૈ ।
રાજાહઙ્કારશમનાયૈ । રાજકાર્યધુરન્ધરાયૈ । રાજાજ્ઞાયૈ ।
રાજમાતઙ્ગ્યૈ । રાજયન્ત્રકૃતાર્ચનાયૈ । રાજક્રીડાયૈ ।
રાજવેશ્મપ્રવેશિતનિજાશ્રિતાયૈ । રાજમન્દિરવાસ્તવ્યાયૈ । રાજસ્ત્રિયૈ ।
રાજજાગરાયૈ । રાજશાપવિનિર્મુક્તાયૈ નમઃ । ૪૦

ૐ શ્રીરાજશ્રિયૈ નમઃ । રાજમન્ત્રિણ્યૈ । રાજપુત્ર્યૈ । રાજમૈત્ર્યૈ ।
રાજાન્તઃપુરવાસિન્યૈ । રાજપાપવિનિર્મુક્તાયૈ । રાજર્ષિપરિસેવિતાયૈ ।
રાજોત્તમમૃગારૂઢાયૈ । રાજ્ઞસ્તેજઃપ્રદાયિન્યૈ ।
રાજાર્ચિતપદામ્ભોજાયૈ । રાજાલઙ્કારવેષ્ટિતાયૈ । રાજસૂયસમારાધ્યાયૈ ।
રાજસાહસ્રસેવિતાયૈ । રાજસન્તાપશમન્યૈ । રાજશબ્દપરાયણાયૈ ।
રાજાર્હમણિભૂષાઢ્યાયૈ । રાજચ્છૃઙ્ગારનાયિકાયૈ ।
રાજદ્રુમૂલસંરાજદ્વિઘ્નેશવરદાયિન્યૈ । રાજપર્વતકૌમાર્યૈ ।
રાજશૌર્યપ્રદાયિન્યૈ નમઃ । ૬૦

ૐ શ્રીરાજાભ્યન્તઃસમારાધ્યાયૈ નમઃ । રાજમૌલિમનસ્વિન્યૈ । રાજમાત્રે ।
રાજમાષપ્રિયાર્ચિતપદામ્બુજાયૈ । રાજારિમર્દિન્યૈ । રાજ્ઞ્યૈ ।
રાજત્કલ્હારહસ્તકાયૈ । રામચન્દ્રસમારાધ્યાયૈ । રામાયૈ ।
રાજીવલોચનાયૈ । રાવણેશસમારાધ્યાયૈ । રાકાચન્દ્રસમાનનાયૈ ।
રાત્રિસૂક્તજપપ્રીતાયૈ । રાગદ્વેષવિવર્જિતાયૈ ।
રિઙ્ખન્નૂપુરપાદાબ્જાયૈ । રિટ્યાદિપરિસેવિતાયૈ ।
રિપુસઙ્ઘકુલધ્વાન્તાયૈ । રિગમસ્વરભૂષિતાયૈ ।
રુક્મિણીશસહોદ્ભૂતાયૈ । રુદ્રાણ્યૈ નમઃ । ૮૦

ૐ શ્રીરુરુભૈરવ્યૈ નમઃ । રુગ્ઘ્ન્યૈ । રુદ્રકોપાગ્નિશમન્યૈ ।
રુદ્રસંસ્તુતાયૈ । રુષાનિવારિણ્યૈ । રૂપલાવણ્યામ્બુધિચન્દ્રિકાયૈ ।
રૂપ્યાસનપ્રિયાયૈ । રૂઢાયૈ । રૂપ્યચન્દ્રશિખામણયે ।
રેફવર્ણગલાયૈ । રેવાનદીતીરવિહારિણ્યૈ ।
રેણુકાયૈ । રેણુકારાધ્યાયૈ । રેવોર્ધ્વકૃતચક્રિણ્યૈ ।
રેણુકેયાખ્યકલ્પોક્તયજનપ્રીતમાનસાયૈ । રોમલમ્બિતવિધ્યણ્ડાયૈ ।
રોમન્થમુનિસેવિતાયૈ । રોમાવલિસુલાવણ્યમધ્યભાગસુશોભિતાયૈ ।
રોચનાગરુકસ્તૂરીચન્દનશ્રીવિલેપિતાયૈ ।
રોહિણીશકૃતોત્તંસાયૈ નમઃ । ૧૦૦

ૐ શ્રીરોહિણીપિતૃવન્દિતાયૈ નમઃ । રોહિતાશ્વસુસમ્ભૂતાયૈ ।
રૌહિણેયાનુજાર્ચિતાયૈ । રૌપ્યસિંહાસનારૂઢચાક્ષુષ્મન્મન્ત્રવિગ્રહાયૈ ।
રૌદ્રમન્ત્રાભિષિક્તાઙ્ગ્યૈ । રૌદ્રમધ્યસમીડિતાયૈ ।
રૌરવાન્તકર્યૈ । રૌચ્યપત્રપુષ્પકૃતાર્ચનાયૈ ।
રઙ્ગલાસ્યકૃતાલોલાયૈ । રઙ્ગવલ્લ્યાદ્યલઙ્કૃતાયૈ ।
રઞ્જકશ્રીસભામધ્યગાયકાન્તરવાસિન્યૈ ।
લલિતાયૈ । લડ્ડુકપ્રીતમાનસાયૈ । સ્કન્દજન્મભુવે ।
લકારત્રયયુક્તશ્રીવિદ્યામન્ત્રકદમ્બકાયૈ । લક્ષણાયૈ ।
લક્ષણારાધ્યાયૈ । લક્ષબિલ્વાર્ચનપ્રિયાયૈ । લજ્જાશીલાયૈ ।
લક્ષણજ્ઞાયૈ નમઃ । ૧૨૦

ૐ શ્રીલકુચાન્નકૃતાદરાયૈ નમઃ । લલાટનયનાર્ધાઙ્ગ્યૈ ।
લવઙ્ગત્વક્સુગન્ધવાચે । લાજહોમપ્રિયાયૈ । લાક્ષાગૃહે
કૌન્તેયસેવિતાયૈ । લાઙ્ગલ્યૈ । લાલનાયૈ । લાલાયૈ । લાલિકાયૈ ।
લિઙ્ગપીઠગાયૈ । લિપિવ્યષ્ટિસમષ્ટિજ્ઞાયૈ । લિપિન્યસ્તત્રિણેત્રભૃતે ।

લુઙ્ગાફલસમાસક્તાયૈ । લુલાયાસુરઘાતુક્યૈ । લૂતિકાપતિસમ્પૂજ્યાયૈ ।
લૂતાવિસ્ફોટનાશિન્યૈ । લૃલૃવર્ણસ્વરૂપાઢ્યાયૈ । લેખિન્યૈ ।
લેખકપ્રિયાયૈ । લેહ્યચોષ્યપેયખાદ્યભક્ષ્યભોજ્યાદિમપ્રિયાયૈ નમઃ । ૧૪૦

ૐ શ્રીલેપિતશ્રીચન્દનાઙ્ગ્યૈ નમઃ । લૈઙ્ગમાર્ગપ્રપૂજિતાયૈ ।
લોલમ્બિરત્નહારાઙ્ગ્યૈ । લોલાક્ષ્યૈ । લોકવન્દિતાયૈ ।
લોપામુદ્રાર્ચિતપદાયૈ । લોપામુદ્રાપતીડિતાયૈ ।
લોભકામક્રોધમોહમદમાત્સર્યવારિતાયૈ । લોહજપ્રતિમાયન્ત્રવાસિન્યૈ ।
લોકરઞ્જિન્યૈ । લોકવેદ્યાયૈ । લોલડોલાસ્થિતશમ્ભુવિહારિણ્યૈ ।
લોલજિહ્વાપરીતાઙ્ગ્યૈ । લોકસંહારકારિણ્યૈ । લૌકિકીજ્યાવિદૂરસ્થાયૈ ।
લઙ્કેશાનસુપૂજિતાયૈ । લમ્પટાયૈ । લમ્બિમાલાભિનન્દિતાયૈ ।
લવલીધરાયૈ । વક્રતુણ્ડપ્રિયાયૈ નમઃ । ૧૬૦

ૐ શ્રીવજ્રાયૈ નમઃ । વધૂટ્યૈ । વનવાસિન્યૈ । વધ્વૈ ।
વચનસન્તુષ્ટાયૈ । વત્સલાયૈ । વટુભૈરવ્યૈ । વટમૂલનિવાસાર્ધાયૈ ।
વરવીરાઙ્ગનાવૃતાયૈ । વનિતાયૈ । વર્ધન્યૈ । વર્ષ્યાયૈ ।
વરાલીરાગલોલુપાયૈ । વલયીકૃતમાહેશકરસૌવર્ણકન્ધરાયૈ ।
વરાઙ્ગ્યૈ । વસુધાયૈ । વપ્રકેલિન્યૈ । વણિજા(જાં)વરાયૈ ।
વપુરાયિતશ્રીચક્રાયૈ । વરદાયૈ નમઃ । ૧૮૦

ૐ શ્રીવરવર્ણિન્યૈ નમઃ । વરાહવદનારાધ્યાયૈ ।
વર્ણપઞ્ચદશાત્મિકાયૈ । વસિષ્ઠાર્ચ્યાયૈ ।
વલ્કલાન્તર્હિતરમ્યસ્તનદ્વય્યૈ । વશિન્યૈ ।
વલ્લક્યૈ । વર્ણ્યાયૈ । વર્ષાકાલપ્રપૂજિતાયૈ । વલ્લ્યૈ ।
વસુદલપ્રાન્તવૃત્તકટ્યાશ્રિતાદરાયૈ । વર્ગ્યાયૈ । વરવૃષારૂઢાયૈ ।
વષણ્મન્ત્રસુસંજ્ઞકાયૈ । વલયાકારવૈડૂર્યવરકઙ્કણભૂષણાયૈ ।
વજ્રાઞ્ચિતશિરોભૂષાયૈ । વજ્રમાઙ્ગલ્યભૂષિતાયૈ । વાગ્વાદિન્યૈ ।
વામકેશ્યૈ । વાચસ્પતિવરપ્રદાયૈ નમઃ । ૨૦૦

ૐ શ્રીવાદિન્યૈ નમઃ । વાગધિષ્ઠાત્ર્યૈ । વારુણ્યૈ । વાયુસેવિતાયૈ ।
વાત્સ્યાયનસુતન્ત્રોક્તાયૈ । વાણ્યૈ । વાક્યપદાર્થજાયૈ ।
વાદ્યઘોષપ્રિયાયૈ । વાદ્યવૃન્દારમ્ભનટોત્સુકાયૈ ।
વાપીકૂપસમીપસ્થાયૈ । વાર્તાલ્યૈ । વામલોચનાયૈ । વાસ્તોષ્પતીડ્યાયૈ ।
વામાઙ્ઘ્રિધૃતનૂપુરશોભિતાયૈ । વામાયૈ । વારાણસીક્ષેત્રાયૈ ।

વાડવેયવરપ્રદાયૈ । વામાઙ્ગાયૈ । વાઞ્છિતફલદાત્ર્યૈ ।
વાચાલખણ્ડિતાયૈ નમઃ । ૨૨૦

ૐ શ્રીવાચ્યવાચકવાક્યાર્થાયૈ નમઃ । વામનાયૈ । વાજિવાહનાયૈ ।
વાસુકીકણ્ઠભૂષાઢ્યવામદેવપ્રિયાઙ્ગનાયૈ । વિજયાયૈ । વિમલાયૈ ।
વિશ્વાયૈ । વિગ્રહાયૈ । વિધૃતાઙ્કુશાયૈ । વિનોદવનવાસ્તવ્યાયૈ ।
વિભક્તાણ્ડાયૈ । વિધીડિતાયૈ । વિક્રમાયૈ । વિષજન્તુઘ્ન્યૈ ।
વિશ્વામિત્રવરપ્રદાયૈ । વિશ્વમ્ભરાયૈ । વિષ્ણુશક્ત્યૈ ।
વિજિજ્ઞાસાવિચક્ષણાયૈ । વિટઙ્કત્યાગરાજેન્દ્રપીઠસંસ્થાયૈ ।
વિધીડિતાયૈ નમઃ । ૨૪૦

ૐ શ્રીવિદિતાયૈ નમઃ । વિશ્વજનન્યૈ । વિસ્તારિતચમૂબલાયૈ ।
વિદ્યાવિનયસમ્પન્નાયૈ । વિદ્યાદ્વાદશનાયિકાયૈ । વિભાકરાયૈ ।
અત્યર્બુદાભાયૈ । વિધાત્ર્યૈ । વિન્ધ્યવાસિન્યૈ । વિરૂપાક્ષસખ્યૈ ।
વિશ્વનાથવામોરુસંસ્થિતાયૈ । વિશલ્યાયૈ । વિશિખાયૈ । વિદ્યાયૈ ।
વિપ્રરૂપાયૈ । વિહારિણ્યૈ । વિનાયકગુહક્રીડાયૈ । વિશાલાક્ષ્યૈ ।
વિરાગિણ્યૈ । વિપુલાયૈ નમઃ । ૨૬૦

ૐ શ્રીવિશ્વરૂપાખ્યાયૈ નમઃ । વિષઘ્ન્યૈ । વિશ્વભામિન્યૈ । વિશોકાયૈ ।
વિરજાયૈ । વિપ્રાયૈ । વિદ્યુલ્લેખેવ ભાસુરાયૈ । વિપરીતરતિપ્રીતપત્યૈ ।
વિજયસંયુતાયૈ । વિરિઞ્ચિવિષ્ણુવનિતાધૃતચામરસેવિતાયૈ ।
વીરપાનપ્રિયાયૈ । વીરાયૈ । વીણાપુસ્તકધારિણ્યૈ । વીરમાર્તણ્ડવરદાયૈ ।
વીરબાહુપ્રિયઙ્કર્યૈ । વીરાષ્ટાષ્ટકપરીતાયૈ । વીરશૂરજનપ્રિયાયૈ ।
વીજિતશ્રીચામરધૃલ્લક્ષ્મીવાણીનિષેવિતાયૈ । વીરલક્ષ્મ્યૈ ।
વીતિહોત્રનિટિલાયૈ નમઃ । ૨૮૦

ૐ શ્રીવીરભદ્રકાયૈ નમઃ । વૃક્ષરાજસુમૂલસ્થાયૈ ।
વૃષભધ્વજલાઞ્છનાયૈ । વૃષાકપાય્યૈ ।
વૃત્તજ્ઞાયૈ । વૃદ્ધાયૈ । વૃત્તાન્તનાયિકાયૈ ।
વૃવૃવર્ણાઙ્ગવિન્યાસાયૈ । વેણીકૃતશિરોરુહાયૈ । વેદિકાયૈ ।
વેદવિનુતાયૈ । વેતણ્ડકૃતવાહનાયૈ । વેદમાત્રે । વેગહન્ત્ર્યૈ ।
વેતસીગૃહમધ્યગાયૈ । વેતાલનટનપ્રીતાયૈ । વેઙ્કટાદ્રિનિવાસિન્યૈ ।
વેણુવીણામૃદઙ્ગાદિવાદ્યઘોષવિશારદાયૈ । વેષિણ્યૈ ।
વૈનતેયાનુકમ્પિન્યૈ નમઃ । ૩૦૦

ૐ શ્રીવૈરિનાશિન્યૈ નમઃ । વૈનાયક્યૈ । વૈદ્યમાત્રે । વૈષ્ણવ્યૈ ।
વૈણિકસ્વનાયૈ । વૈજયન્તીષ્ટવરદાયૈ । વૈકુણ્ઠવરસોદર્યૈ ।
વૈશાખપૂજિતાયૈ । વૈશ્યાયૈ । વૈદેહ્યૈ । વૈદ્યશાસિન્યૈ ।
વૈકુણ્ઠાયૈ । વૈજયન્તીડ્યાયૈ । વૈયાઘ્રમુનિસેવિતાયૈ ।
વૈહાયસીનટીરાસાયૈ । વૌષટ્શ્રૌષટ્સ્વરૂપિણ્યૈ । વન્દિતાયૈ ।
વઙ્ગદેશસ્થાયૈ । વંશીગાનવિનોદિન્યૈ । વમ્ર્યાદિરક્ષિકાયૈ નમઃ । ૩૨૦

ૐ શ્રીવઙ્ક્યૈ નમઃ । વન્દારુજનવત્સલાયૈ । વન્દિતાખિલલોકશ્રિયૈ ।
વક્ષઃસ્થલમનોહરાયૈ । શર્વાણ્યૈ । શરભાકારાયૈ ।
શપ્તજન્માનુરાગિણ્યૈ । શક્વર્યૈ । શમિતાઘૌઘાયૈ । શક્તાયૈ ।
શતકરાર્ચિતાયૈ । શચ્યૈ । શરાવત્યૈ । શક્રસેવ્યાયૈ ।
શયિતસુન્દર્યૈ । શરભૃતે । શબર્યૈ । શક્તિમોહિન્યૈ ।
શણપુષ્પિકાયૈ । શકુન્તાક્ષ્યૈ નમઃ । ૩૪૦

ૐ શ્રીશકારાખ્યાયૈ નમઃ । શતસાહસ્રપૂજિતાયૈ । શબ્દમાત્રે ।
શતાવૃત્તિપૂજિતાયૈ । શત્રુનાશિન્યૈ । શતાનન્દાયૈ ।
શતમુખ્યૈ । શમીબિલ્વપ્રિયાયૈ । શશ્યૈ । શનકૈઃ
પદવિન્યસ્તપ્રદક્ષિણનતિપ્રિયાયૈ । શાતકુમ્ભાભિષિક્તાઙ્ગ્યૈ ।
શાતકુમ્ભસ્તનદ્વય્યૈ । શાતાતપમુનીન્દ્રેડ્યાયૈ ।
શાલવૃક્ષકૃતાલયાયૈ । શાસકાયૈ । શાક્વરપ્રીતાયૈ । શાલાયૈ ।
શાકમ્ભરીનુતાયૈ । શાર્ઙ્ગપાણિબલાયૈ । શાસ્તૃજનન્યૈ નમઃ । ૩૬૦

ૐ શ્રીશારદામ્બિકાયૈ નમઃ । શાપમુક્તમનુપ્રીતાયૈ । શાબરીવેષધારિણ્યૈ ।
શામ્ભવ્યૈ । શાશ્વતૈશ્વર્યાયૈ । શાસનાધીનવલ્લભાયૈ ।
શાસ્ત્રતત્ત્વાર્થનિલયાયૈ । શાલિવાહનવન્દિતાયૈ ।
શાર્દૂલચર્મવાસ્તવ્યાયૈ । શાન્તિપૌષ્ટિકનાયિકાયૈ ।
શાન્તિદાયૈ । શાલિદાયૈ । શાપમોચિન્યૈ । શાડવપ્રિયાયૈ ।
શારિકાયૈ । શુકહસ્તોર્ધ્વાયૈ । શાખાનેકાન્તરશ્રુતાયૈ ।
શાકલાદિમઋક્શાખામન્ત્રકીર્તિતવૈભવાયૈ ।
શિવકામેશ્વરાઙ્કસ્થાયૈ । શિખણ્ડિમહિષ્યૈ નમઃ । ૩૮૦

ૐ શ્રીશિવાયૈ નમઃ । શિવારમ્ભાયૈ । શિવાદ્વૈતાયૈ ।
શિવસાયુજ્યદાયિન્યૈ । શિવસઙ્કલ્પમન્ત્રેડ્યાયૈ ।
શિવેન સહ મોદિતાયૈ । શિરીષપુષ્પસઙ્કાશાયૈ ।

શિતિકણ્ઠકુટુમ્બિન્યૈ । શિવમાર્ગવિદાં શ્રેષ્ઠાયૈ ।
શિવકામેશસુન્દર્યૈ । શિવનાટ્યપરીતાઙ્ગ્યૈ ।
શિવજ્ઞાનપ્રદાયિન્યૈ । શિવનૃત્તસદાલોકમાનસાયૈ ।
શિવસાક્ષિણ્યૈ । શિવકામાખ્યકોષ્ઠસ્થાયૈ । શિશુદાયૈ ।
શિશુરક્ષક્યૈ । શિવાગમૈકરસિકાયૈ । શિક્ષિતાસુરકન્યકાયૈ ।
શિલ્પિશાલાકૃતાવાસાયૈ નમઃ । ૪૦૦

ૐ શ્રીશિખિવાહાયૈ નમઃ । શિલામય્યૈ ।
શિંશપાવૃક્ષફલવદ્ભિન્નાનેકારિમસ્તકાયૈ ।
શિરઃસ્થિતેન્દુચક્રાઙ્કાયૈ । શિતિકુમ્ભસુમપ્રિયાયૈ ।
શિઞ્જન્નૂપુરભૂષાત્તકૃતમન્મથભેરિકાયૈ । શિવેષ્ટાયૈ ।
શિબિકારૂઢાયૈ । શિવારાવાભયઙ્કર્યૈ । શિરોર્ધ્વનિલયાસીનાયૈ ।
શિવશક્ત્યૈક્યરૂપિણ્યૈ । શિવાસનસમાવિષ્ટાયૈ । શિવાર્ચ્યાયૈ ।
શિવવલ્લભાયૈ । શિવદર્શનસન્તુષ્ટાયૈ । શિવમન્ત્રજપપ્રિયાયૈ ।
શિવદૂત્યૈ । શિવાયૈ । અનન્યાયૈ । શિવાસનસમન્વિતાયૈ નમઃ । ૪૨૦

ૐ શ્રીશિષ્યાચરિતશૈલેશાયૈ નમઃ । શિવગાનવિગાયિન્યૈ ।
શિવશૈલકૃતાવાસાયૈ । શિવામ્બાયૈ । શિવકોમલાયૈ ।
શિવગઙ્ગાસરસ્તીરપ્રત્યઙ્મન્દિરવાસિન્યૈ ।
શિવાક્ષરારમ્ભપઞ્ચદશાક્ષરમનુપ્રિયાયૈ । શિખાદેવ્યૈ ।
શિવાભિન્નાયૈ । શિવતત્ત્વવિમર્શિન્યૈ । શિવાલોકનસન્તુષ્ટાયૈ ।
શિવાર્ધાઙ્ગસુકોમલાયૈ । શિવરાત્રિદિનારાધ્યાયૈ । શિવસ્ય
હૃદયઙ્ગમાયૈ । શિવરૂપાયૈ । શિવપરાયૈ । શિવવાક્યાર્થબોધિન્યૈ ।
શિવાર્ચનરતાયૈ । શિલ્પલક્ષણાયૈ । શિલ્પિસેવિતાયૈ નમઃ । ૪૪૦

ૐ શ્રીશિવાગમરહસ્યોક્ત્યા શિવોઽહમ્ભાવિતાન્તરાયૈ નમઃ ।
શિમ્બીજશ્રવણાનન્દાયૈ । શિમન્તર્નામમન્ત્રરાજે ।
શીકારાયૈ । શીતલાયૈ । શીલાયૈ । શીતપઙ્કજમધ્યગાયૈ ।
શીતભીરવે । શીઘ્રગન્ત્ર્યૈ । શીર્ષકાયૈ । શીકરપ્રભાયૈ ।
શીતચામીકરાભાસાયૈ । શીર્ષોદ્ધૂપિતકુન્તલાયૈ ।
શીતગઙ્ગાજલસ્નાતાયૈ । શુકા(ક્રા)રાધિતચક્રગાયૈ । શુક્રપૂજ્યાયૈ ।
શુચ્યૈ । શુભ્રાયૈ । શુક્તિમુક્તાયૈ । શુભપ્રદાયૈ નમઃ । ૪૬૦

ૐ શ્રીશુચ્યન્તરઙ્ગાયૈ નમઃ । શુદ્ધાઙ્ગ્યૈ । શુદ્ધાયૈ । શુક્યૈ ।

શુચિવ્રતાયૈ । શુદ્ધાન્તાયૈ । શૂલિન્યૈ । શૂર્પકર્ણામ્બાયૈ ।
શૂરવન્દિતાયૈ । શૂન્યવાદિમુખસ્તમ્ભાયૈ । શૂરપદ્મારિજન્મભુવે ।
શ‍ૃઙ્ગારરસસમ્પૂર્ણાયૈ । શ‍ૃઙ્ગિણ્યૈ । શ‍ૃઙ્ગઘોષિણ્યૈ ।
શ‍ૃઙ્ગાભિષિક્તસુશિરસે । શ‍ૃઙ્ગ્યૈ । શ‍ૃઙ્ખલદોર્ભટાયૈ ।
શૃશ્વૃરૂપાયૈ । શેષતલ્પભાગિન્યૈ । શેખરોડુપાયૈ નમઃ । ૪૮૦

ૐ શ્રીશોણશૈલકૃતાવાસાયૈ નમઃ । શોકમોહનિવારિણ્યૈ । શોધન્યૈ ।
શોભનાયૈ । શોચિષ્કેશતેજઃપ્રદાયિન્યૈ । શૌરિપૂજ્યાયૈ ।
શૌર્યવીર્યાયૈ । શૌક્તિકેયસુમાલિકાયૈ । શ્રિયૈ । શ્રીધનસમ્પન્નાયૈ ।
શ્રીકણ્ઠસ્વકુટુમ્બિન્યૈ । શ્રીમાત્રે । શ્રીફલ્યૈ । શ્રીલાયૈ ।
શ્રીવૃક્ષાયૈ । શ્રીપતીડિતાયૈ । શ્રીસંજ્ઞાયુતતામ્બૂલાયૈ ।
શ્રીમત્યૈ । શ્રીધરાશ્રયાયૈ । શ્રીબેરબદ્ધમાલાઢ્યાયૈ નમઃ । ૫૦૦

ૐ શ્રીશ્રીફલાયૈ નમઃ । શ્રીશિવાઙ્ગનાયૈ । શ્રુત્યૈ ।
શ્રુતિપદન્યસ્તાયૈ । શ્રુતિસંસ્તુતવૈભવાયૈ । શ્રૂયમાણચતુર્વેદાયૈ ।
શ્રેણિહંસનટાઙ્ઘ્રિકાયૈ । શ્રેયસ્યૈ । શ્રેષ્ઠિધનદાયૈ ।
શ્રોણાનક્ષત્રદેવતાયૈ । શ્રોણિપૂજ્યાયૈ । શ્રોત્રકાન્તાયૈ । શ્રોત્રે
શ્રીચક્રભૂષિતાયૈ । શ્રૌષડ્રૂપાયૈ । શ્રૌતસ્માર્તવિહિતાયૈ ।
શ્રૌતકામિન્યૈ । શમ્બરારાતિસમ્પૂજ્યાયૈ । શઙ્કર્યૈ । શમ્ભુમોહિન્યૈ ।
ષષ્ઠ્યૈ નમઃ । ૫૨૦

ૐ શ્રીષડાનનપ્રીતાયૈ નમઃ । ષટ્કર્મનિરતસ્તુતાયૈ ।
ષટ્શાસ્ત્રપારસન્દર્શાયૈ । ષષ્ઠસ્વરવિભૂષિતાયૈ ।
ષટ્કાલપૂજાનિરતાયૈ । ષણ્ઢત્વપરિહારિણ્યૈ । ષડ્રસપ્રીતરસનાયૈ ।
ષડ્ગ્રન્થિવિનિભેદિન્યૈ । ષડભિજ્ઞામતધ્વંસ્યૈ ।
ષડ્જસંવાદિવાહિતાયૈ । ષટ્ત્રિંશત્તત્ત્વસમ્ભૂતાયૈ ।
ષણ્ણવત્યુપશોભિતાયૈ । ષણ્ણવતિતત્ત્વનિત્યાયૈ ।
ષડઙ્ગશ્રુતિપારદૃશે । ષાણ્ડદેહાર્ધભાગસ્થાયૈ ।
ષાડ્ગુણ્યપરિપૂરિતાયૈ । ષોડશાક્ષરમન્ત્રાર્થાયૈ ।
ષોડશસ્વરમાતૃકાયૈ । ષોઢાવિભક્તષોઢાર્ણાયૈ ।
ષોઢાન્યાસપરાયણાયૈ નમઃ । ૫૪૦

ૐ શ્રીસકલાયૈ નમઃ । સચ્ચિદાનન્દાયૈ । સાધ્વ્યૈ । સારસ્વતપ્રદાયૈ ।
સાયુજ્યપદવીદાત્ર્યૈ । સિંહાસનેશ્વર્યૈ । સિનીવાલ્યૈ । સિન્ધુસીમાયૈ ।

સીતાયૈ । સીમન્તિનીસુખાયૈ । સુનન્દાયૈ । સૂક્ષ્મદર્શાઙ્ગ્યૈ ।
સૃણિપાશવિધારિણ્યૈ । સૃષ્ટિસ્થિતિસંહારતિરોધાનાનુગ્રહાત્મિકાયૈ ।
સેવ્યાયૈ । સેવકસંરક્ષાયૈ । સૈંહિકેયગ્રહાર્ચિતાયૈ ।
સોઽહમ્ભાવૈકસુલભાયૈ । સોમસૂર્યાગ્નિમણ્ડનાયૈ ।
સૌઃકારરૂપાયૈ નમઃ । ૫૬૦

ૐ શ્રીસૌભાગ્યવર્ધિન્યૈ નમઃ । સંવિદાકૃત્યૈ । સંસ્કૃતાયૈ ।
સંહિતાયૈ । સઙ્ઘાયૈ । સહસ્રારનટાઙ્ગનાયૈ ।
હકારદ્વયસન્દિગ્ધમધ્યકૂટમનુપ્રભાયૈ । હયગ્રીવમુખારાધ્યાયૈ ।
હરિર્હરપતિવ્રતાયૈ । હાદિવિદ્યાયૈ । હાસ્યભસ્મીકૃતત્રિપુરસુન્દર્યૈ ।
હાટકશ્રીસભાનાથાયૈ । હિઙ્કારમન્ત્રચિન્મય્યૈ ।
હિરણ્મયપુ(પ)રાકોશાયૈ । હિમાયૈ । હીરકકઙ્કણાયૈ ।
હ્રીઙ્કારત્રયસમ્પૂર્ણાયૈ । હ્લીઙ્કારજપસૌખ્યદાયૈ ।
હુતાશનમુખારાધ્યાયૈ । હુઙ્કારહતકિલ્બિષાયૈ નમઃ । ૫૮૦

ૐ શ્રીહૂં પૃચ્છા(ષ્ટા)નેકવિજ્ઞાપ્ત્યૈ નમઃ । હૃદયાકારતાણ્ડવાયૈ ।
હૃદ્ગ્રન્થિભેદિકાયૈ । હૃલ્લ્રીમન્ત્રવર્ણસ્વરૂપિણ્યૈ ।
હેમસભામધ્યગતાયૈ । હેમાયૈ । હૈમવતીશ્વર્યૈ ।
હૈયઙ્ગવીનહૃદયાયૈ । હોરાયૈ । હૌઙ્કારરૂપિણ્યૈ । હંસકાન્તાયૈ ।
હંસમન્ત્રતત્ત્વાર્થાદિમબોધિન્યૈ । હસ્તપદ્માલિઙ્ગિતામ્રનાથાયૈ ।
અનૃતાનૃતસંવેદ્યાયૈ । અપર્ણાયૈ । અર્ભકાયૈ । આત્મજાયૈ ।
આદિભૂસદનાકારજાનુદ્વયવિરાજિતાયૈ । આત્મવિદ્યાયૈ ।
ઇક્ષુચાપવિધાત્ર્યૈ નમઃ । ૬૦૦

ૐ શ્રીઇન્દુકલાધરાયૈ નમઃ । ઇન્દ્રાક્ષ્યૈ । ઇષ્ટાર્થદાયૈ । ઇન્દ્રાયૈ ।
ઇરમ્મદસમપ્રભાયૈ । ઈકારચતુરોપેતાયૈ । ઈશતાણ્ડવસાક્ષિણ્યૈ ।
ઉમાયૈ । ઉગ્રભૈરવાકારાયૈ । ઊર્ધ્વરેતોવ્રતાઙ્ગનાયૈ । ઋષિસ્તુતાયૈ ।
ઋતુમત્યૈ । ઋજુમાર્ગપ્રદર્શિન્યૈ । ઋજુવાદનસન્તુષ્ટાયૈ ।
ૡૃવર્ણમનુસ્વનાયૈ । એધમાનપ્રભાયૈ । એલાયૈ । એકાન્તાયૈ ।
એકપાટલાયૈ । એત્યક્ષરદ્વિતીયાઙ્કુકાદિવિદ્યાસ્વરૂપિણ્યૈ નમઃ । ૬૨૦

ૐ શ્રીઐન્દ્રાયૈ નમઃ । ઐશ્વર્યદાયૈ । ઓજાયૈ । ઓઙ્કારાર્થપ્રદર્શિન્યૈ ।
ઔષધાયિતસાહસ્રનામમન્ત્રકદમ્બકાયૈ । અમ્બાયૈ । અમ્ભોજનિલયાયૈ ।
અંશભૂતાન્યદેવતાયૈ । અર્હણાયૈ । આહવનીયાગ્નિમધ્યગાયૈ ।

અહમિતીરિતાયૈ । કલ્યાણ્યૈ । કત્રયાકારાયૈ । કાઞ્ચીપુરનિવાસિન્યૈ ।
કાત્યાયન્યૈ । કામકલાયૈ । કાલમેઘાભમૂર્ધજાયૈ । કાન્તાયૈ ।
કામ્યાયૈ । કામજાતાયૈ નમઃ । ૬૪૦

ૐ શ્રીકામાક્ષ્યૈ નમઃ । કિઙ્કિણીયુતાયૈ । કીનાશનાયિકાયૈ ।
કુબ્જકન્યકાયૈ । કુઙ્કુમાકૃત્યૈ । કુલ્લુકાસેતુસંયુક્તાયૈ ।
કુરઙ્ગનયનાયૈ । કુલાયૈ । કૂલઙ્કુષકૃપાસિન્ધવે ।
કૂર્મપીઠોપરિસ્થિતાયૈ । કૃશાઙ્ગ્યૈ । કૃત્તિવસનાયૈ । ક્લીઙ્કાર્યૈ ।
ક્લીમ્મનૂદિતાયૈ । કેસરાયૈ । કેલિકાસારાયૈ । કેતકીપુષ્પભાસુરાયૈ ।
કૈલાસવાસાયૈ । કૈવલ્યપદસઞ્ચારયોગિન્યૈ । કોશામ્બાયૈ નમઃ । ૬૬૦

ૐ શ્રીકોપરહિતાયૈ નમઃ । કોમલાયૈ । કૌસ્તુભાન્વિતાયૈ । કૌશિક્યૈ ।
કંસદૃષ્ટાઙ્ગ્યૈ । કઞ્ચુક્યૈ । કર્મસાક્ષિણ્યૈ । ક્ષમાયૈ ।
ક્ષાન્ત્યૈ । ક્ષિતીશાર્ચ્યાયૈ । ક્ષીરાબ્ધિકૃતવાસિન્યૈ ।
ક્ષુરિકાસ્ત્રાયૈ । ક્ષેત્રસંસ્થાયૈ । ક્ષૌમામ્બરસુશુભ્રગાયૈ ।
ખવાસાયૈ । ખણ્ડિકાયૈ । ખાઙ્કુકોટિકોટિસમપ્રભાયૈ ।
ખિલર્ક્સૂક્તજપાસક્તાયૈ । ખેટગ્રહાર્ચિતાન્તરાયૈ । ખણ્ડિતાયૈ નમઃ । ૬૮૦

ૐ શ્રીખણ્ડપરશુસમાશ્લિષ્ટકલેવરાયૈ નમઃ ।
ગવ્ય(ગવય)શૃઙ્ગાભિષિક્તાઙ્ગ્યૈ । ગવાક્ષ્યૈ ।
ગવ્યમજ્જનાયૈ । ગણાધિપપ્રસુવે । ગમ્યાયૈ । ગાયત્ર્યૈ ।
ગાનમાલિકાયૈ । ગાર્હપત્યાગ્નિસમ્પૂજ્યાયૈ । ગિરીશાયૈ । ગિરિજાયૈ ।
ગિરે । ગીર્વાણીવીજનાનન્દાયૈ । ગીતિશાસ્ત્રાનુબોધિન્યૈ ।
ગુગ્ગુલો(લૂ)પેતધૂપાઢ્યાયૈ । ગુડાન્નપ્રીતમાનસાયૈ ।
ગૂઢકોશાન્તરારાધ્યાયૈ । ગૂઢશબ્દવિનોદિન્યૈ ।
ગૃહસ્થાશ્રમસમ્ભાવ્યાયૈ । ગૃહશ્રેણીકૃતોત્સવાયૈ નમઃ । ૭૦૦

ૐ શ્રીગૃ-ગૄ-શબ્દસુવિજ્ઞાત્ર્યૈ નમઃ । ગેયગાનવિગાયિન્યૈ ।
ગૈરિકાભરણપ્રીતાયૈ । ગોમાત્રે । ગોપવન્દિતાયૈ । ગૌર્યૈ ।
ગૌરવત્રૈપુણ્ડ્રાયૈ । ગઙ્ગાયૈ । ગન્ધર્વવન્દિતાયૈ । ગહનાયૈ ।
ગહ્વરાકારદહરાન્તઃસ્થિતાયૈ । ઘટાયૈ । ઘટિકાયૈ ।
ઘનસારાદિનીરાજનસમપ્રભાયૈ । ઘારિપૂજ્યાયૈ । ઘુસૃણાભાયૈ ।
ઘૂર્ણિતાશેષસૈનિકાયૈ । ઘૃ-ઘૃ-ઘૄ-સ્વરસમ્પન્નાયૈ ।
ઘોરસંસારનાશિન્યૈ । ઘોષાયૈ નમઃ । ૭૨૦

ૐ શ્રીઘૌષાક્તખડ્ગાસ્ત્રાયૈ નમઃ । ઘણ્ટામણ્ડલમણ્ડિતાયૈ ।
ઙકારાયૈ । ચતુરાયૈ । ચક્ર્યૈ । ચામુણ્ડાયૈ । ચારુવીક્ષણાયૈ ।
ચિન્તામણિમનુધ્યેયાયૈ । ચિત્રાયૈ । ચિત્રાર્ચિતાયૈ ।
ચિત્યૈ । ચિદાનન્દાયૈ । ચિત્રિણ્યૈ । ચિચ્ચિન્ત્યાયૈ ।
ચિદમ્બરેશ્વર્યૈ । ચીનપટ્ટાંશુકાલેપકટિદેશસમન્વિતાયૈ ।
ચુલુકીકૃતવારાશિમુનિસેવિતપાદુકાયૈ ।
ચુમ્બિતસ્કન્દવિઘ્નેશપરમેશપ્રિયંવદાયૈ । ચૂલિકાયૈ ।
ચૂર્ણિકાયૈ નમઃ । ૭૪૦

ૐ શ્રીચૂર્ણકુન્તલાયૈ નમઃ । ચેટિકાઽઽવૃતાયૈ ।
ચૈત્ર્યૈ । ચૈત્રરથારૂઢાયૈ । ચોલભૂપાલવન્દિતાયૈ ।
ચોરિતાનેકહૃત્પદ્માયૈ । ચૌક્ષાયૈ । ચન્દ્રકલાધરાયૈ ।
ચર્મકૃષ્ણમૃગાધિષ્ઠાયૈ । છત્રચામરસેવિતાયૈ ।
છાન્દોગ્યોપનિષદ્ગીતાયૈ । છાદિતાણ્ડસ્વશામ્બર્યૈ । છાન્દસાનાં
સ્વયંવ્યક્તાયૈ । છાયામાર્તાણ્ડસેવિતાયૈ । છાયાપુત્રસમારાધ્યાયૈ ।
છિન્નમસ્તાવરપ્રદાયૈ । જયદાયૈ । જગતીકન્દાયૈ ।
જટાધરધૃતાયૈ । જયાયૈ નમઃ । ૭૬૦

ૐ શ્રીજાહ્નવ્યૈ નમઃ । જાતવેદાખ્યાયૈ । જાપકેષ્ટહિતપ્રદાયૈ ।
જાલન્ધરાસનાસીનાયૈ । જિગીષાયૈ । જિતસર્વભુવે । જિષ્ણવે ।
જિહ્વાગ્રનિલયાયૈ । જીવન્યૈ । જીવકેષ્ટદાયૈ । જુગુપ્સાઢ્યાયૈ ।
જૂત્યૈ । જૂર્ણાયૈ - વ૨્ જૂતિજૂર્ણાયૈ । જૃમ્ભકાસુરસૂદિન્યૈ ।
જૈત્ર્યૈ । જૈવાતૃકોત્તંસાયૈ । જોટિઙ્ગાયૈ - વ૨્ જોષઙ્ગાયૈ ।
જોષદાયિન્યૈ । ઝઞ્ઝાનિલમહાવેગાયૈ । ઝષાયૈ નમઃ । ૭૮૦

ૐ શ્રીઝર્ઝરઘોષિણ્યૈ નમઃ । ઝિણ્ટીસુમપરપ્રેમિણે / પ્રીતાયૈ ।
ઝિલ્લિકાકેલિલાલિતાયૈ । ટઙ્કહસ્તાયૈ । ટઙ્કિતજ્યાયૈ ।
ટિટ્ટરીવાદ્યસુપ્રિયાયૈ । ટિટ્ટિભાસનહૃત્સંસ્થાયૈ ।
ઠવર્ગચતુરાનનાયૈ । ડમડુમરુવાદ્યૂર્ધ્વાયૈ ।
ણકારાક્ષરરૂપિણ્યૈ । તત્ત્વજ્ઞાયૈ । તરુણ્યૈ ।
સેવ્યાયૈ । તપ્તજામ્બૂનદપ્રભાયૈ । તત્ત્વપુસ્તોલ્લસત્પાણ્યૈ ।
તપનોડુપલોચનાયૈ । તાર્તીયભૂપુરાત્મસ્વપાદુકાયૈ । તાપસેડિતાયૈ ।
તિલકાયિતસર્વેશનિટિલેક્ષણશોભનાયૈ ।
તિથિસ્તિલ્લવનાન્તઃસ્થાયૈ નમઃ । ૮૦૦

ૐ શ્રીતીક્ષ્ણાયૈ નમઃ । તીર્થાન્તલિઙ્ગયુજે । તુલસ્યૈ ।
તુરગારૂઢાયૈ । તૂલિન્યૈ । તૂર્યવાદિન્યૈ । તૃપ્તાયૈ ।
તૃણીકૃતારાતિસેનાસઙ્ઘમહાભટાયૈ । તેજિનીવનમાયૂર્યૈ ।
તૈલાદ્યૈરભિષેચિતાયૈ । તોરણાઙ્કિતનક્ષત્રાયૈ ।
તોટકીવૃત્તસન્નુતાયૈ । તૌણીરપુષ્પવિશિખાયૈ ।
તૌર્યત્રિકસમન્વિતાયૈ । તન્ત્રિણ્યૈ । તર્કશાસ્ત્રજ્ઞાયૈ ।
તર્કવાર્તાવિદૂરગાયૈ । તર્જન્યઙ્ગુષ્ઠસંલગ્નમુદ્રાઞ્ચિતકરાબ્જિકાયૈ ।
થકારિણ્યૈ । થાં થીં થોં થૈં કૃતલાસ્યસમર્થકાયૈ નમઃ । ૮૨૦

ૐ શ્રીદશાશ્વરથસંરૂઢાયૈ નમઃ । દક્ષિણામૂર્તિસંયુગાયૈ ।
દશબાહુપ્રિયાયૈ । દહ્રાયૈ । દશાશાશાસનેડિતાયૈ ।
દારકાયૈ । દારુકારણ્યવાસિન્યૈ । દિગ્વિલાસિન્યૈ । દીક્ષિતાયૈ ।
દીક્ષિતારાધ્યાયૈ । દીનસન્તાપનાશિન્યૈ । દીપાગ્રમઙ્ગલાયૈ । દીપ્તાયૈ ।
દીવ્યદ્બ્રહ્માણ્ડમેખલાયૈ । દુરત્યયાયૈ । દુરારાધ્યાયૈ । દુર્ગાયૈ ।
દુઃખનિવારિણ્યૈ । દૂર્વાસતાપસારાધ્યાયૈ । દૂત્યૈ નમઃ । ૮૪૦

ૐ શ્રીદૂર્વાપ્રિયપ્રસુવે નમઃ । દૃષ્ટાન્તરહિતાયૈ ।
દેવમાત્રે । દૈત્યવિભઞ્જિન્યૈ । દૈવિકાગારયન્ત્રસ્થાયૈ ।
દોર્દ્વન્દ્વાતીતમાનસાયૈ । દૌર્ભાગ્યનાશિન્યૈ । દૌત્યૈ ।
દૌવારિકનિધિદ્વય્યૈ । દણ્ડિનીમન્ત્રિણીમુખ્યાયૈ । દહરાકાશમધ્યગાયૈ ।
દર્ભારણ્યકૃતાવાસાયૈ । દહ્રવિદ્યાવિલાસિન્યૈ । ધન્વન્તરીડ્યાયૈ ।
ધનદાયૈ । ધારાસાહસ્રસેચનાયૈ । ધેનુમુદ્રાયૈ । ધેનુપૂજ્યાયૈ ।
ધૈર્યાયૈ । ધૌમ્યનુતિપ્રિયાયૈ નમઃ । ૮૬૦

ૐ શ્રીનમિતાયૈ નમઃ । નગરાવાસાયૈ । નટ્યૈ । નલિનપાદુકાયૈ । નકુલ્યૈ ।
નાભિનાલાગ્રાયૈ । નાભાવષ્ટદલાબ્જિન્યૈ । નારિકેલામૃતપ્રીતાયૈ ।
નારીસમ્મોહનાકૃત્યૈ । નિગમાશ્વરથારૂઢાયૈ । નીલલોહિતનાયિકાયૈ ।
નીલોત્પલપ્રિયાયૈ । નીલાયૈ । નીલામ્બાયૈ । નીપવાટિકાયૈ ।
નુતકલ્યાણવરદાયૈ । નૂતનાયૈ । નૃપપૂજિતાયૈ ।
નૃહરિસ્તુતહૃત્પૂર્ણાયૈ । નૃત્તેશ્યૈ નમઃ । ૮૮૦

ૐ શ્રીનૃત્તસાક્ષિણ્યૈ નમઃ । નૈગમજ્ઞાનસંસેવ્યાયૈ ।
નૈગમજ્ઞાનદુર્લભાયૈ । નૌકારૂઢેશવામોરુવીક્ષિતસ્થિરસુન્દર્યૈ ।

નન્દિવિદ્યાયૈ । નન્દિકેશવિનુતાયૈ । નન્દનાનનાયૈ । નન્દિન્યૈ ।
નન્દજાયૈ । નમ્યાયૈ । નન્દિતાશેષભૂપુરાયૈ । નર્મદાયૈ ।
પરમાદ્વૈતભાવિતાયૈ । પરિપન્થિન્યૈ । પરાયૈ । પરીતદિવ્યૌઘાયૈ ।
પરશમ્ભુપુરન્ધ્રિકાયૈ । પથ્યાયૈ । પરબ્રહ્મપત્ન્યૈ ।
પતઞ્જલિસુપૂજિતાયૈ નમઃ । ૯૦૦

ૐ શ્રીપદ્માક્ષ્યૈ નમઃ । પદ્મિન્યૈ । પદ્માયૈ । પરમાયૈ ।
પદ્મગન્ધિન્યૈ । પયસ્વિન્યૈ । પરેશાનાયૈ । પદ્મનાભસહોદર્યૈ ।
પરાર્ધાયૈ । પરમૈશ્વર્યકારણાયૈ । પરમેશ્વર્યૈ ।
પાતઞ્જલાખ્યકલ્પોક્તશિવાવરણસંયુતાયૈ । પાશકોદણ્ડસુમભૃતે ।
પારિપાર્શ્વકસન્નુતાયૈ । પિઞ્છા(ઞ્જા)વિલેપસુમુખાયૈ । પિતૃતુલ્યાયૈ ।
પિનાકિન્યૈ । પીતચન્દનસૌગન્ધાયૈ । પીતામ્બરસહોદ્ભવાયૈ ।
પુણ્ડરીકપુરીમધ્યવર્તિન્યૈ નમઃ । ૯૨૦

ૐ શ્રીપુષ્ટિવર્ધિન્યૈ નમઃ । પૂરયન્ત્યૈ । પૂર્યમાણાયૈ । પૂર્ણાભાયૈ ।
પૂર્ણિમાન્તરાયૈ । પૃચ્છામાત્રાતિશુભદાયૈ । પૃથ્વીમણ્ડલશાસિન્યૈ ।
પૃતનાયૈ । પેશલાયૈ । પેરુમણ્ડલાયૈ । પૈત્રરક્ષક્યૈ ।
પૌષ્ણ્યૈ । પૌણ્ડ્રેક્ષુકોદણ્ડાયૈ । પઞ્ચપઞ્ચાક્ષર્યૈ ।
મનવે । પઞ્ચમીતિથિસમ્ભાવ્યાયૈ । પઞ્ચકોશાન્તરસ્થિતાયૈ ।
ફણાધિપસમારાધ્યાયૈ । ફણામણિવિભૂષિતાયૈ ।
બકપુષ્પકૃતોત્તંસાયૈ નમઃ । ૯૪૦

ૐ શ્રીબગલાયૈ નમઃ । બલિન્યૈ । બલાયૈ । બાલાર્કમણ્ડલાભાસાયૈ ।
બાલાયૈ । બાલવિનોદિન્યૈ । બિન્દુચક્રશિવાઙ્કસ્થાયૈ ।
બિલ્વભૂષિતમૂર્ધજાયૈ । બીજાપૂરફલાસક્તાયૈ ।
બીભત્સાવહદૃક્ત્રય્યૈ । બુભુક્ષાવર્જિતાયૈ । બુદ્ધિસાક્ષિણ્યૈ ।
બુધવર્ષકાયૈ । બૃહત્યૈ । બૃહદારણ્યનુતાયૈ । બૃહસ્પતીડિતાયૈ ।
બેરાખ્યાયૈ । બૈન્દવાકારવૈરિઞ્ચસુષિરાન્તરાયૈ । બોદ્ધ્ર્યૈ ।
બોધાયનાયૈ નમઃ । ૯૬૦

ૐ શ્રીબૌદ્ધદર્શનાયૈ નમઃ । બન્ધમોચન્યૈ । ભટ્ટારિકાયૈ ।
ભદ્રકાલ્યૈ । ભારતીભાયૈ । ભિષગ્વરાયૈ । ભિત્તિકાયૈ ।
ભિન્નદૈત્યાઙ્ગાયૈ । ભિક્ષાટનસહાનુગાયૈ । ભીષણાયૈ ।
ભીતિરહિતાયૈ । ભુવનત્રયશઙ્કરાયૈ । ભૂતઘ્ન્યૈ ।

ભૂતદમન્યૈ । ભૂતેશાલિઙ્ગનોત્સુકાયૈ । ભૂતિભૂષિતસર્વાઙ્ગ્યૈ ।
ભૃગ્વઙ્ગિરમુનિપ્રિયાયૈ । ભૃઙ્ગિનાટ્યવિનોદજ્ઞાયૈ ।
ભૈરવપ્રીતિદાયિન્યૈ । ભોગિન્યૈ નમઃ । ૯૮૦

ૐ શ્રીભોગશમન્યૈ નમઃ । ભોગમોક્ષપ્રદાયિન્યૈ । ભૌમપૂજ્યાયૈ ।
ભણ્ડહન્ત્ર્યૈ । ભગ્નદક્ષક્રતુપ્રિયાયૈ । મકારપઞ્ચમ્યૈ ।
મહ્યાયૈ । મદન્યૈ । મકરધ્વજાયૈ । મત્સ્યાક્ષ્યૈ । મધુરાવાસાયૈ ।
મન્વશ્રહૃદયાશ્રયાયૈ । માર્તાણ્ડવિનુતાયૈ । માણિભદ્રેડ્યાયૈ ।
માધવાર્ચિતાયૈ । માયાયૈ । મારપ્રિયાયૈ । મારસખીડ્યાયૈ ।
માધુરીમનસે । માહેશ્વર્યૈ નમઃ । ૧૦૦૦

ૐ શ્રીમાહિષઘ્ન્યૈ નમઃ । મિથ્યાવાદપ્રણાશિન્યૈ । મીનાક્ષ્યૈ ।
મીનસંસૃષ્ટાયૈ । મીમાંસાશાસ્ત્રલોચનાયૈ । મુગ્ધાઙ્ગ્યૈ ।
મુનિવૃન્દાર્ચ્યાયૈ । મુક્તિદાયૈ । મૂલવિગ્રહાયૈ ।
મૂષિકારૂઢજનન્યૈ । મૂઢભક્તિમદર્ચિતાયૈ । મૃત્યુઞ્જયસત્યૈ ।
મૃગ્યાયૈ । મૃગાલેપનલોલુપાયૈ । મેધાપ્રદાયૈ ।
મેખલાઢ્યાયૈ । મેઘવાહનસેવિતાયૈ । મેનાऽऽત્મજાયૈ ।
મૈથિલીશકૃતાર્ચનપદામ્બુજાયૈ । મૈત્ર્યૈ નમઃ । ૧૦૨૦

ૐ શ્રીમૈનાકભગિન્યૈ નમઃ । મોહજાલપ્રણાશિન્યૈ । મોદપ્રદાયૈ ।
મૌલિગેન્દુકલાધરકિરીટભાજે । મૌહૂર્તલગ્નવરદાયૈ । મઞ્જીરાયૈ ।
મઞ્જુભાષિણ્યૈ । મર્મજ્ઞાત્ર્યૈ । મહાદેવ્યૈ । યમુનાયૈ ।
યજ્ઞસમ્ભવાયૈ । યાતનારહિતાયૈ । યાનાયૈ । યામિનીપૂજકેષ્ટદાયૈ ।
યુક્તાયૈ । યૂપાયૈ । યૂથિકાર્ચ્યાયૈ । યોગાયૈ । યોગેશયોગદાયૈ
(યક્ષરાજસખાન્તરાયૈ) । રથિન્યૈ નમઃ । ૧૦૪૦

ૐ શ્રીરજન્યૈ નમઃ । રત્નગર્ભાયૈ । રક્ષિતભૂરુહાયૈ । રમાયૈ ।
રસક્રિયાયૈ । રશ્મિમાલાસન્નુતવૈભવાયૈ । રક્તાયૈ । રસાયૈ । રત્યૈ ।
રથ્યાયૈ । રણન્મઞ્જીરનૂપુરાયૈ । રક્ષાયૈ । રવિધ્વજારાધ્યાયૈ ।
રમણ્યૈ । રવિલોચનાયૈ । રસજ્ઞાયૈ । રસિકાયૈ । રક્તદન્તાયૈ ।
રક્ષાણલમ્પટાયૈ । રક્ષોઘ્નજપસન્તુષ્ટાયૈ નમઃ । ૧૦૬૦

ૐ શ્રીરક્તાઙ્ગાપાઙ્ગલોચનાયૈ નમઃ । રત્નદ્વીપવનાન્તઃસ્થાયૈ ।
રજનીશકલાધરાયૈ । રત્નપ્રાકારનિલયાયૈ । રણમધ્યાયૈ ।
રમાર્થદાયૈ । રજનીમુખસમ્પૂજ્યાયૈ । રત્નસાનુસ્થિતાયૈ ।

રથ્યૈ નમઃ । ૧૦૬૯

॥ ઇતિ શ્રીયોગનાયિકા અથવા શ્રીરાજરાજેશ્વરી સહસ્રનામાવલિઃ સમાપ્તા ॥

Proofread PSA Easwaran

---

*Shri Shriyoganayika or RajarajeshvarI Sahasranamavali 1000 Names*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*